Shri Raghunatha Temple MSS. Library,
JAMMU

५३९३

No. २४८ क

Title पूर्व मीमांसा संग्रह:

Author

Extent ६ पत्र Age

Subject मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

नं॰ २ पूर्वमीमांसा

२२

१५

पूर्वमीमांसा सङ्ग्रहः

नं॰ २४८

18

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

नं० २४८

पूर्वमीमांसा सङ्ग्रहः ।

१५

5393
7

३८

५५
२४८

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रीगणेशाय नमः ॐ अथपू
र्वमीमांसायाउपयोगीनिसूत्रा सूत्रं
णिस्वोपयोगार्थं लिख्यन्ते ॐ अथा
तोधर्मजिज्ञासा अथशब्दोवेदा
ध्ययनानन्तर्यवचनः अतःशब्दो
वेदाध्ययनस्यदृष्टार्थत्वेनस्वाध्या
योध्येतव्यइत्यध्ययनविधेस्तदध्य
यनस्यार्थज्ञानरूपदृष्टार्थत्वेन
व्यवस्थापनात् तथाचवेदाध्य
यनानन्तरंयतोर्थज्ञानरूपदृ
ष्टार्थकंतदध्ययनम् अतोहे
तोर्धर्मस्यवेदार्थस्यजिज्ञासा

© Dharmartha Trust J&K. Digitized by eGangotri

मी
सा॰
१

कर्तव्येतिघोषः अथकोयमर्थ
स्तल्लक्षणमाह वेदप्रतिपा
द्यः प्रयोजनवदर्थोधर्मइति
अपौरुषेयंवाक्यंवेदः स
चविधिमंत्रनामधेयनि
षेधार्थवादभेदात्पञ्च
विधः अज्ञातज्ञापकोवे
दभागोविधिः यथाग्निहोत्रंजु
हुयात्स्वर्गकामइतिविधिर्माना
न्तरेणाप्राप्तस्वर्गप्रयोजनवद्धो
मंविधत्ते अग्निहोत्रहोमेन
स्वर्गंभावयेदितिवाक्या

© Dharmartha Trust J&K. Digitized by eGangotri

षेवोयः एतस्यविधेः सहकारि
भूतानिषट्प्रमाणानिश्रुतिलि।
ङ्गवाक्यप्रकरणस्थानसमाख्या
रूपाणि निरपेक्षोरवःश्रुतिः
यथाव्रीहिभिर्यजेतेतितृतीयया
श्रुत्याव्रीहीणांयागाङ्गत्वमव्रो।
हीस्मोत्तति इतिश्रोतत्त्वंहितो।
यथाश्रुसा शब्दसामर्थ्यंलिङ्गः।
म यथाङ्कःसामर्थ्यंसर्वशब्दानां
लिङ्गमित्यभिधीयते इतितेनैवबर्हि
र्देवसदनंदामीतिमन्त्रस्यकुशल।
वणाङ्गत्वम् समभिव्याहारोवा।
क्यम् समभिव्यवहारश्चसाध्या।
दिवाचकद्वितीयाद्यभावेविशेष
शेषिवाचकपदयोःसहोच्चारणं।

© Dharmartha Trust J&K. Digitized by eGangotri

म् यथावर्णैमर्थोज्ञहूर्भवतितम
पांपस्त्रेणोतीसत्रवर्णेनाज्ञह्वैः
समभिव्याहारादेवर्णेनाघाज्ञ।
हूतम् ३ अथाकांक्षाप्रकरणम्
यथाप्रयाजादिषु समियोयजती
मादिवाकेफलविशेषस्यानिर्दे
शात्समियोयजतीभ्यादिवाकेफ
लविशेषस्यानिर्देशात्समियागे
भावयेदितिवाक्यान्तरम् किमि
मस्तूपकार्योकां[illegible]कांक्षांभाव
येदितिवाक्यान्तरम् किमिमस्तु
पकार्योकांक्षादर्शपौर्णमासस्वा
केपिदर्शपौर्णमासाभ्यांस्वर्गं।
भावयेदितिवाक्यान्तरम् देशसा।
मान्यस्थानम् तत्रैन्द्राग्नमेकाद।

© Dharmartha Trust J&K. Digitized by eGangotri

शाकपालंनिवेधेरिमंवक्रमविहिते
पुरस्ताद्दीनांयाज्यानुवाक्यामन्त्राणां
यसंख्येप्रथमस्यप्रथमभिस्मादि
समाख्यायौगिकःशाब्दः तदेवंनि
रूपितोविधिः प्रयोगसमवेतार्थ
स्मारकामन्त्राः तेषांचतदृष्टार्थ
स्मारकत्वेनैवार्थवत्त्वम् ननुतद
ष्टार्थदृष्टार्थंसम्भवतिदृष्टफलक
त्वेऽदृष्टकल्पनायाअन्याय्यत्वात् ।
नानाम्नायनस्यप्रापकोविधिर्निय
मविधिः तदाहुः विधिरत्यन्तमप्रा।
प्तौनियमःपाक्षिकेसतितत्रचान्य।
त्रचप्राप्तौपरिसंख्येतिगीयते॥ अत्रा अयंवार्तिक श्लोकः
र्थःप्रमाणान्तरेणाप्राप्तस्यप्रापको
विधिरपूर्वविधिःयथायजेतस्वर्गी

© Dharmartha Trust J&K. Digitized by eGangotri

मी
मा
९

3

कामइत्यादिः स्वर्गार्थकयागस्य
प्रमाणान्तरेणाप्राप्तत्वेनविधा
नात् पक्षेऽप्राप्तस्यप्रापकोविधि
र्नियमविधिः यथाव्रीहीनवहन्ती
तिकथमस्यपक्षेप्रापकत्वमिति
चेदित्थम् अनेनहिवचनेनास्यवैतु
ष्यार्थत्वंनप्रतिपद्यतेवैतुष्यस्यहि
नानोपायसाध्यत्वाद्यदावघातंनप
रित्यज्योपायान्तरंगृहीत्वारभ्य
ते तदावघातस्याप्राप्तत्वेनतद्वि
धाननामकमप्राप्तांशपूरणमेवा
नेनविधिनाक्रियते अतएवनिय
मंविधायप्राप्तांशपूरणात्मकोनि
यमएववाक्यार्थः उभयोश्चयुग
पत्प्राप्तावितरव्यावृत्तिपरोविधिः

© Dharmartha Trust J&K. Digitized by eGangotri

परिसंख्याविधिः यथा पञ्च पञ्च
नखा भक्ष्या इति इदं हि वाक्यं न प
ञ्चनखभक्षणपरं तस्य रागतः प्रा
प्तत्वात् नापि नियमपरं पञ्चनखा
भक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्य
भावात् अत इदमपञ्चनखभक्षण
निवृत्तिपरम् इति भवति परिसं
ख्याविधिः पुरुषस्य निवर्तकं वा
क्यं निषेधः यथा कलञ्जं न भक्ष
येत् प्राशस्त्यनिन्दान्यतरपरं वाक्य
मर्थवादः स च द्विविधः विधिशे
षो निषेधशेषश्चेति तत्र वायव्यं श्वे
तमजमालभेत भूतिकाम इत्यादि
विधिशेषस्य वायुर्वै क्षेपिष्ठा देवते
त्यादि विधेयार्थप्राशस्त्यबोधकत्व

© Dharmartha Trust J&K. Digitized by eGangotri

मी
सा
५

॰ पंतदपिवा
र्तिकश्लोकं

यार्थवत्त्वम् बर्हिषि रजतं न देयमि
त्यादिनिषेधशेषस्य सोरोदीद्यदरो
दीत्तद्रुद्रस्य रुद्रत्वमित्यादेर्निषि
ध्यनिन्दितत्वबोधकतयार्थवत्त्व
मस्य च पुनस्त्रेधा ॰ विरोधे गुणवा
दः स्यादनुवादोवधारिते भूतार्थ
वादस्तद्धानादर्थवादस्त्रिधा
मतः यथादित्यो यूपः यूपे आदि
त्याभेदस्य प्रत्यक्षबाधितत्वादादि
त्यवदुज्ज्वलत्वरूपगुणोनेन लक्ष
णया प्रतिपाद्यते प्रमाणान्तराव
गतार्थबोधकोनुवादः यथाग्निर्हि
मस्य भेषजमिति हिमविरोधित्व
स्याग्नेः प्रत्यक्षावगतत्वात् प्रमाणा
न्तरविरोधतत्प्राप्तिरहितार्थबोध

© Dharmartha Trust J&K. Digitized by eGangotri

कोऽर्थवादो भूतार्थवादः यथेन्द्रो
वृत्राय वज्रमुदयच्छदिति यजेत।
स्वर्गकाम इति सोऽयं धर्मो यदुद्दि
श्य विहितस्तदेशेन क्रियमाणस्त
द्वेत्तीश्वरार्पणबुद्ध्या क्रियमाण।
स्तु निःश्रेयसहेतुरिति इति पूर्व्वा
मीमांसासंक्षेपः समाप्तः॥ शोधितः साहिबरामनाथेन॥
ॐ श्रीगणेशाय नमः ॐ प्रकाश
मात्रं यस्यांकं भैरवीयं परं महः त
त्रस्वतन्त्रतामात्रमधिकं प्रविवि च्य
ते १ यः प्रकाशः स विश्वस्य प्रका
शनं प्रयच्छति न च तद्व्यतिरेका।
स्ति विश्वं सद्वावभासते २ अतो।
ऽपरमेशानः स्वात्मव्योमन्यनर्ग
लः इयतः सृष्टिसंहाराडम्बरस्य प्रव

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ

नेकः ३ निर्मले मकुरे यद्वद्भान्ति
भूमिजलादयः अमिश्रास्तद्वदे-
कस्मिंश्चिन्नाथे विश्ववृत्तयः ४ स
दृशं भाति नयनदर्पणांबरवारिषु
तथा हि निर्मले रूपे रूपमेवावभास
ते ५ प्रच्छन्नरागिणी कान्तप्रति-
बिम्बितसुन्दरम् दर्पणं कुचकुंभा
भ्यां स्पृशन्त्यपि न तुष्यति ६ न हि
स्पर्शस्य विमलो रूपमेव तथा यतः
वैमल्यं चास्ति निविडसजातीयैक
संहतिः ७ स्वस्मिन्नभेदाद्भिन्नस्य
दर्शनक्षमतैव या अमुक्तस्वप्रका
शस्य नैर्मल्यं तद्गुरूदितं ८ नैर्म-
ल्यं मुख्यमेतस्य संविन्नाथस्य सर्व
तः अंशांशिकातः क्वाप्यस्तिम

लेतनदिस्थया ९ भावानोयस्मा
नीद्यातिवपुर्मायात्मकेहितन ने
घामेवास्तिसद्विद्यामयनवप्रतिद्या
नकम् ९ तद्देवमुभयाकारमव
भासंप्रकाशयन् विभातिवरदोवि
वशतिविंवनघाखिले ॥ यस्माद्
नेत्रतेजांसिस्वच्छात्मनिफलन्सले
विपर्यस्तकंवक्रोर्ध्वहान्तीतिस
ष्टस्ते १२ देहादन्यत्रयनेजस्तद
पिष्टानरात्मनः नेनैवतेजसांत
वेकोर्थः स्याद्दर्पणेनन १३ विप
र्यस्तस्तेजोभिर्ग्राहकान्तनमाग
तेः शूपंदृश्यनवटनेतिजेनम्
गान्तरे १४ स्वभुविस्पर्शीवक्षेत्रतद्रूप
भायान्मेममलं ननस्पर्शपणभि

तस्मादेकोम
हेपुनः स्वात
त्र्यायहनस्थि
ति: । द्विवेनभा
त्यसौ बिंब प्रति
बिम्बादयात्मना
+ १२ दर्प

ङ

© Dharmartha Trust J&K. Digitized by eGangotri

प्र.
वि
८

त्मस्यैवैकान्तस्वरूपिणः १६
रूपं तस्याननमात्रेण तत्स्पर्शगन्धर
सादिभिः सम्भूतैरेव न युक्तं व
क्तुं तत्प्रतिबिम्बितम् १७ समभा
वो ग्राह्यत्वाभावात् तद्भावे प्रमाण
तः सर्वार्थसङ्गमाभावात्सोऽप्य
दर्शनव स्थितेः १८ अन्तपवगुरु
त्वादिर्यमीनेतस्याभासते नत्वा
दर्शे संस्थिते सौनद्द्रष्टस्तु उपाय
कः १९ तस्मात्त्वेषभेदेन यद्गा
ति तत्तदुच्यते आधारस्तत्रूपा
यादीपदकसंविदः क्रमात् २०
वि दीपवत्तद्धि वैयानेकादिसाभा
वतः परम् सर्वनस्यापि नेमित्त्या
त्रविभादर्शावस्थक २१ यत

श्रीदेवदेवेन दर्शितं [illegible] यहृदये
मूढानां वस्तु भवति न तन्मयमत्रा-
नाप्यलम् २२ प्रतीच्यांतिस्वता-
न्त्रे नो न स्याच्च स्यापि चापि न
स्वच्छस्यैवैषकस्यापि महिमेति
कृपालुना २३ नैदेशैर्नो हूपेन
च समययोगेन परिमानचात्मो
मासङ्गो न च तत्परहानिर्नेयदना
न चावस्तुत्वं स्यान्न च किमपि सा
रे निजमिति फ़ंवं मोहः शाम्यदि
ति निरदिशद्गुरुर्विधिम् २४
इति बिंबप्रतिबिंबवादः ॥

शोधितः श्री साहिबकोल दीवाना
यकेन ।। श्रीराम सिंहार्थं ।।
शुभाय भवतुतरां

प्र॰ वि॰ ७

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri